श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

## श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ अग्रमणिमालास्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ अग्रमणिमालास्तोत्रम् ॥

लक्ष्मीचरणराजीवलाक्षालक्षितवक्षसे।
विश्वसर्गादिलीलाय वेङ्कटब्रह्मणे नमः ॥ **1.1** ॥

भजे दुग्धाम्बुधिं यत्र परिष्कर्तुं हरेरुरः।
कठिनं सुकुमारं च रत्नं प्रादुरभूद् द्विधा ॥ **2.1** ॥

श्रये शेषाचलमणेः शार्ङ्गिणो हृदयङ्गमाम्।
अनुकम्पामिवाकम्पामम्बामम्बुजवासिनीम् ॥ **3.1** ॥

भजे भुजङ्गशैलेशभुजान्तरपरिष्क्रियाम्।
तनयां दुग्धजलधेर्दयामिव कृतोदयाम् ॥ **4.1** ॥

लक्ष्मीवदन लावण्यसुधोदधि कृतोदयः।
कल्पवृक्षः कटाक्षात्मा काङ्क्षितानि करोतु नः ॥ **5.1** ॥

श्रीनिवासस्य महिषीं श्रेयसे तामुपास्महे।
यदर्थमेव विदधे यत्नं भूयांसमच्युतः ॥ **6.1** ॥

भागधेयं भजेयं तत् फणिशैलकुटुम्बिनः।
मनीषिणो यदेवाहुः मङ्गलानां च मङ्गलम् ॥ **7.1** ॥

वन्दे सौन्दर्यपर्याप्तिभूमिं कामपि देवताम्।
अब्जं सहोदरं यस्याः शंसन्त्यब्जशरं सुतम् ॥ **8.1** ॥

दुर्ज्ञेयमहिमा सा मां क्षीराब्धि दुहिताऽवतात्।
शृङ्गाररससर्वस्वं शेषशैलेश्वरस्य या॥ **9.1** ॥

विश्वस्य जननीमेव विश्वस्य शरणं वृणे।
विश्वम्भरसमैश्वर्यां विदुर्यां ब्रह्मवादिनः॥ **10.1** ॥

त्रायतामायताक्षं तद्धाम तामरसालयम्।
मदागसां प्रतीकारे महतामपि यत्क्षमा॥ **11.1** ॥

विख्यात विभवा सा मां विष्णुपत्नी विलोकताम्।
विपुलानुत्सवान् यस्या विरिञ्च्याद्या वितन्वते॥ **12.1** ॥

वाराशि दुहितुस्तस्या वरिवस्यां विदध्महे।
अनन्यजनसामान्याम् आहुर्यस्या वदान्यताम्॥ **13.1** ॥

यशस्विनीमुपासीय यदुनाथसधर्मिणीम्।
यमकं कथयन्त्यार्या यत्पदं कल्पशाखिनः॥ **14.1** ॥

आनन्दमैन्दिराः कुर्युरपाङ्गा यत्प्रसङ्गतः।
अश्विनीहस्तिसंपन्ना सम्पदुज्जृम्भते नृणाम्॥ **15.1** ॥

पवित्रं पद्मनाभस्य कलत्रं तत्पुनातु नः।
विचित्रं त्रिषु लोकेषु चरित्रं यस्य गीयते॥ **16.1** ॥

धाम्ना दृश्येय राजीवधाम्ना तेन दयालुना।
आम्नानं जातुचिद्यस्य नाम्नां ज्ञानैर्युनक्ति नः॥ **17.1** ॥

अरविन्दवनं वन्दे तदहं यदहर्निशम्।
प्रीतिपूर्वक मध्यास्ते पीताम्बर कुटुम्बिनी॥ **18.1** ॥

अभयं भयमित्येतदुभयं सर्वदेहिनाम्।
यत्सेवातदभावाभ्यां तामहं श्रियमाश्रये॥ **19.1** ॥

वन्दारुरक्षणे दक्षां वन्दे गोविन्दसुन्दरीम्।
यत्प्रसादादृते देवाः सर्वे रक्षितुमक्षमाः॥ **20.1** ॥

दशस्वप्यवतारेषु देवो यद्रूप संप्लवात्।
साधयामास कार्याणि सतां तस्यै श्रियै नमः॥ **21.1** ॥

कमलायतनां चित्ते कलये यत्पदाम्बुजम्।
चिरं विबुधसन्मौळि चित्रस्तबक भूषितम्॥ **22.1** ॥

समस्तगुणविस्तार समावेशनिवेशनम्।
वन्देऽरविन्दनिलयं वरदं परदैवतम्॥ **23.1** ॥

शरणीकरणीयाङ्घ्रिं शाश्वत्तापत्रयातुरैः।
सर्वनिर्वेदशमनीं समस्तजननीं नुमः॥ **24.1** ॥

दुग्धां दुग्धाम्बुधेः पुत्रि दुरितापहरा मम।
शार्ङ्गिणश्चरणाम्भोज शरणागति संपदम्॥ **25.1** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे अग्रमणिमालास्तोत्रं समाप्तम्॥